2019 - 2013

**Jadavpur University**
**M.A. Admission Test in Sanskrit, 2019**

**Time: 2 Hours** | **Full Marks: 50**

**PART- I (Seen)**

षष्ठं विहाय सर्वे प्रश्नाः देवभाषया देवनागर्या च लिप्या समाधेयाः। सर्वत्र अधःप्रदत्तेभ्यो विकल्पेभ्यो यथायथम् उत्तरम् आदाय पूर्णवाक्यनिर्माणपुरःसरं समाधानं कर्तव्यम्।

१। अभिज्ञानशाकुन्तलम् **[1X4=4]**

क) 'पुरः प्रतिहतं शैले स्रोतः स्रोतवहो यथा'– 'स्रोतः' कस्योपमानम्?

मार्गस्य, मनसः, देशस्य, जीवनस्य।

ख) 'परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः'– कः सखा?

वैखानसः, दुष्यन्तः, शारद्वतः, विदूषकः।

ग) अधोलिखितयुग्मेभ्यः समीचीनं पदजातं परस्परं योजनीयम्।

| | |
|---|---|
| अ) अन्तर्हिते शशिनि | उ) शुचं गणयिष्यसि |
| आ) यास्यत्यद्य शकुन्तलेति | ऊ) धावति पश्चादसंस्थितं चेतः |
| इ) मम विरहजां न त्वं वत्से | ऋ) सैव कुमुद्वती मे |
| ई) गच्छति पुरः शरीरं | ॠ) हृदयं संस्पृष्टमुत्कण्ठया |

घ) 'अहो रागपरिवाहिणी गीतिः'– कस्याः गीतिः?

वसुन्धरायाः, शकुन्तलायाः, प्रियंवदायाः, हंसपदिकायाः।

२। कारकसमासौ **[1X8=8]**

क) ज्ञानी त्वात्मैव मे मतम्। अत्र अधोरेखाङ्कितपदस्य विभक्तिनिरूपणाय कस्य पाणिनीयसूत्रस्योपयोगः स्यात्?

मतिबुद्धिपूजार्थेभ्यश्च, क्तस्य च वर्तमाने, कर्तृकर्मणोः कृति, अधिकरणवाचिनश्च।

ख) ते ब्रह्म तद्विदुः। अत्र अधोरेखाङ्कितपदस्य कारकनिरूपणाय कस्य पाणिनीयसूत्रस्योपयोगः स्यात्?

साधकतमं करणम्, स्वतन्त्रः कर्ता, कर्तुरीप्सिततमं कर्म, कर्मणा यमभिप्रैति स संप्रदानम्।

[Turn over

ग) असक्तो ह्याचरन्...........................परमाप्नोति पुरुषः।

कर्मणि, कर्मणा, कर्म, कर्मणे।

घ) प्रत्यक्षेण तावत्..............................उपलभ्यते।

संसारः, संसारम्, संसारेण, संसारात्।

ङ) अपविष्णु– इत्यत्र कः समासः?

पञ्चमी–तत्पुरुषः, अव्ययीभावः, प्रादितत्पुरुषः, कर्मधारयः।

च) चतुर्दन्– अस्य किं विग्रहवाक्यम्?

चतुर्णां दन्तानां समाहारः, चत्वारः दन्ताः, चत्वारः दन्ताः यस्य सः, चत्वारि दानानि।

छ) प्रवणम्– इत्यत्र कः समासः?

गतितत्पुरुषः, अव्ययीभावः, बहुव्रीहिः, प्रादितत्पुरुषः।

ज) प्राप्तजीविकः– इत्यत्र कः समासः?

द्वितीया–तत्पुरुषः, प्रादितत्पुरुषः, अव्ययीभावः, बहुव्रीहिः।

३। <u>तर्कसंग्रहः</u> [1X3=3]

क) रूपत्वसामान्यप्रत्यक्षे कः संनिकर्षः?

संयुक्तसमवायः, संयोगः, संयुक्तसमवेतसमवायः, विशेषणविशेष्यभावः।

ख) चूर्णादिपिण्डीभावहेतुर्गुणः.......................।

स्नेहः, शब्दः, रसः, जलम्।

ग) वेगः कस्य भेदः?

कर्मणः, संस्कारस्य, स्मृतेः, मनसः।

४। <u>अग्निसूक्तम् (१.१)</u> [1X3=3]

क) ................................... 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

द्वितीयस्यां पवमानेष्टौ, प्रातरनुवाक आग्नेये क्रतौ, अग्नीषोम–प्रणयणे, अभिप्लवषडहस्य मध्यवर्तिषूक्थ्येषु तृतीयसवने।

ख) 'स इद्देवेषु गच्छति' इति पादगतस्य 'देवेषु' इति पदस्य पदपाठे स्वरो भवति–

दे॒वे॒षु, दे॒वेषु॑, दे॑वेषु, देवे॑षु।

ग) सायणाचार्यमतानुसारं 'दोषावस्तः' इति पदे कः समासः?

षष्ठी–तत्पुरुषः, द्वितीया–तत्पुरुषः, द्वन्द्वः, बहुव्रीहिः।

५। <u>मनुसंहिता (सप्तमोऽध्यायः)</u> **[1X3=3]**

क) कीदृशः नृपतिः न विनश्यति?

बलवान्, सुन्दरः, विनीतात्मा, विजयी।

ख) कामजो गणः.......................।

दशकः, नवकः, अष्टकः, सप्तकः।

ग) संधिविपर्ययौ कस्मिन् आयत्तौ?

अमात्ये, दण्डे, नृपतौ, दूते।

६। <u>**History of Classical and Technical Sanskrit Literature**</u> **[1X7=7]**

**Answer in full sentence in English:**

a) Who wrote the *Bālarāmāyaṇa*?
Bhāsa, Rājaśekhara, Bhaṭṭanārāyaṇa, Bhavabhūti.

b) *Vidagdhamādhava* is ascribed to–
Śeṣakṛṣṇa, Ravivarman, Rūpa-gosvāmin, Nṛsiṁha.

c) Who was the author of the *Moharājaparājaya*?
Yaśaḥpāla, Kṛṣṇamiśra, Śaṁkara, Bhartṛari.

d) Who is the author of *Sarvadarśanasaṁgraha*?
Sāyaṇa, Mādhava, Kumārila, Madanamiśra.

e) Who among the following are the hero and heroine of *Mṛcchakaṭika*?
Udayana-Vāsavadattā, Nala-Damayantī, Cārudatta-Vasantasenā, Puṇḍarīka-Mahāśvetā.

f) Who composed *Kalpadrukośa*?
Harśakīrti, Keśava, Rādhākāntadeva, Bhoja.

g) Which of the following is ascribed to Somadevasūri?
*Nītisāra, Nītivākyāmṛta, Pramāṇasamuccaya, Jātakamālā.*

७। साहित्यदर्पणः (षष्ठपरिच्छेदः) [1X4=4]

क) शाकुन्तले कीदृशी प्रस्तावना?

प्रवर्तकः, अवलगितः, कथोद्घातः, प्रयोगातिशयः।

ख) अर्थोपक्षेपकाः..............।

पञ्च, षट्, सप्त, अष्टौ।

ग) विष्कम्भकः कुत्र स्यात्?

आदावङ्कस्य, अङ्कद्वयमध्ये, अङ्कान्ते, अङ्कमध्ये।

घ) व्यापि प्रासङ्गिकं वृत्तं–

प्रतिमुखम्, पताका, गर्भः, प्रवेशकः।

८। ईशोपनिषद् [1X3=3]

क) शंकराचार्यमतेन 'पूर्णमदः'–इत्यत्र 'पूर्णम्' इत्यनेन किं सूचितम्?

परं ब्रह्म, अपरं ब्रह्म, जगत्, जीवः।

ख) 'ईशा वास्यम्' इत्यत्र कः ईश्?

जीवः, हिरण्यगर्भः, परमात्मा, वैश्वानरः।

ग) के जनाः तमसावृतान् लोकान् प्रेत्याभिगच्छन्ति?

हत्याकारिणः, आत्महनः, हिंसकाः, अन्धाः।

## PART II (Unseen)

१। देवभाषायां भाषान्तरं कार्यम्। [2X2.5=5]

a) As soon as the situation changes, that evil will come out. But when a moral conduct is absorbed by the person, then that character becomes steady.

b) I read an English book long ago where it is said: one can change one's bad actions into good actions without changing the mental disposition that made him or her adopt evil actions.

१०। <u>अधोलिखितेषु विषयेषु एकम् अवलम्ब्य वाक्यपञ्चकेन अनुच्छेदो वि रच्यताम्।</u> [5]

क) वर्तमानकाले ग्रन्थागारः।

ख) जीवनाश्रयि चलच्चित्रम्।

ग) मातृभाषा।

११। अनुच्छेदं पठित्वा अधःप्रदत्तानां प्रश्नानां समाधानं देवभाषया क्रियताम्। [1X5=5]

ऋषयः ऊचुः

समन्तपञ्चकमिति यदुक्तं सूतनन्दनः।
एतत् सर्वं यथातत्त्वं श्रोतुमिच्छामहे वयम्॥

सौतिरुवाच

शृणुध्वं मम भो विप्राः! ब्रुवतश्च कथाः शुभाः।
समन्तपञ्चकाख्यं च श्रोतुमर्हथ सत्तमाः॥
त्रेताद्वापरयोः संधौ रामः शस्त्रभृतां वरः।
असकृत् पार्थिवं क्षत्रं जघानामर्षचोदितः॥
स सर्वं क्षत्रमुत्साद्य स्ववीर्येणानलद्युतिः।
समन्तपञ्चके पञ्च चकार रौधिरान् ह्रदान्॥
स तेषु रुधिराम्भःसु ह्रदेषु क्रोधमूर्छितः।
पितॄन् संतर्पयामास रुधिरेणेति नः श्रुतम्॥
अर्थर्चीकादयोऽभ्येत्य पितरो राममब्रुवन्।
राम! राम! महाभाग! प्रीताः स्मस्तव भार्गव!॥

प्रश्नाः

१) केषां संवादोऽयम्?
२) किं श्रोतुमिच्छन्ति श्रोतारः?
३) कस्य रामस्य कथेयम्?
४) कस्मिन् समये तस्याविर्भावोऽभवत्?
५) पितॄन् स केन संतर्पयामास?

*******